# Uttaradinacharya

# ઉત્તરદિનચર્યા

## Document Information

Text title : Uttaradinacharya

File name : uttaradinacharyA.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Ramanuja Stotramala

Latest update : November 23, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

July 6, 2021

*sanskritdocuments.org*

# ઉત્તરદિનચર્યા

શ્રીદેવરાજગુરુભિરનુગૃહીતા
શ્રીરસ્તુ ।
શ્રીમતે હયગ્રીવાય નમઃ ।
શ્રીમતે રામાનુજાય નમઃ ॥

અથ ગોષ્ઠીં ગરિષ્ઠાનામધિષ્ઠાય સુમેધસામ્ ।
વાક્યાલઙ્કૃતિવાક્યાનાં વ્યાખ્યાતારં નમામિ તમ્ ॥ ૧॥

સાયન્તનં તતઃ કૃત્વા સમ્યગારાધનં હરેઃ ।
સ્વૈરાલાપૈઃ શુભૈશ્શ્રોતૄન્નન્દયન્તં નમામિ તમ્ ॥ ૨॥

તતઃ કનકપર્યઙ્કે તરુણદ્યુમણિદ્યુતૌ ।
વિશાલવિમલશ્લક્ષ્ણતુઙ્ગતૂલાસનોજ્જ્વલે ॥ ૩॥

સમગ્રસૌરભોદ્ગારનિરન્તરદિગન્તરે ।
સોપધાને સુખાસીનં સુકુમારે વરાસને ॥ ૪॥

ઉન્મીલત્પદ્મગર્ભદ્યુતિતલમુપરિ ક્ષીરસઙ્ઘાતગૌરં
    રાકાચન્દ્રપ્રકાશપ્રચુરનખમણિદ્યોતવિદ્યોતમાનમ્ ।
અઙ્ગુલ્યગ્રેષુ કિઞ્ચિન્નતમતિમૃદુલં રમ્યજામાતૃયોગી
    દિવ્યં તત્પાદયુગ્મં દિશતુ શિરસિ મે દેશિકેન્દ્રો દયાલુઃ ॥ ૫॥

ત્વં મે બન્ધુસ્ત્વમસિ જનકસ્ત્વં સખા દેશિકસ્ત્વં
    વિદ્યા વૃત્તં સુકૃતમતુલં વિત્તમપ્યુત્તમં ત્વમ્ ।
આત્મા શેષી ભવસિ ભગવન્નાન્તરશ્શાસિતા ત્વં
    યદ્વા સર્વં વરવરમુને ! યદ્યદાત્માનુરૂપમ્ ॥ ૬॥

અગ્રે પશ્ચાદુપરિ પરિતો ભૂતલં પાર્શ્વતો મે
    મૌલૌ વક્ત્રે વપુષિ સકલે માનસામ્ભોરુહે ચ ।
દર્શંદર્શં વરવરમુને દિવ્યમઙ્ઘ્રિદ્વયં તે

નિત્યં મજ્જન્નમૃતજલધૌ નિસ્તરેયં ભવાબ્ધિમ્ ॥ ૭॥

કર્માધીને વપુષિ કુમતિઃ કલ્પયન્નાત્મભાવં
દુઃખે મગ્નઃ કિમિતિ સુચિરં દૂયતે જન્તુરેષઃ ।
સર્વં ત્યક્ત્વા વરવરમુને ! સંપ્રતિ ત્વત્પ્રસાદા-
દ્દિવ્યં પ્રાપ્તુમસ્તવ પદયુગં દેહિ મે સુપ્રભાતમ્ ॥ ૮॥

યા યા વૃત્તિર્મનસિ મમ સા જાયતાં સંસ્મૃતિસ્તે
યો યો જલ્પસ્સ ભવતુ! વિભો! નામસઙ્કીર્તનં તે ।
યા યા ચેષ્ટા વપુષિ ભગવન્ ! સા ભવેદ્વન્દનં તે
સર્વં ભૂયાદ્વરવરમુને ! સમ્યગારાધનં તે ॥ ૯॥

અપગતમદમાનૈરન્તિમોપાયનિષ્ઠૈ-
રધિગતપરમાર્થૈરર્થકામાનપેક્ષૈઃ ।
નિખિલજનસુહૃદ્ભિર્નિર્જિતક્રોધલોભૈ-
ર્વરવરમુનિભૃત્યૈરસ્તુ મે નિત્યયોગઃ ॥ ૧૦॥

ઇતિ સ્તુતિનિબન્ધેન સૂચિતસ્વમનીષિતાન્ ।
ભૃત્યાન્ પ્રેમાર્દ્રયા દૃષ્ટ્યા સિઞ્ચન્તં સિન્તયામિ તમ્ ॥ ૧૧॥

અથ ભૃત્યાનનુજ્ઞાપ્ય કૃત્વા ચેતશ્શુભાશ્રયે ।
શયનીયં પરિષ્કૃત્ય શયાનં સંસ્મરામિ તમ્ ॥ ૧૨॥

દિનચર્યામિમાં દિવ્યાં રમ્યજામાતૃયોગિનઃ ।
ભક્ત્યા નિત્યમનુધ્યાયન્ પ્રાપ્નોતિ પરમં પદમ્ ॥ ૧૩॥

ઇતિ ઉત્તરદિનચર્યા સમાપ્તા ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

---

*Uttaradinacharya*

pdf was typeset on July 6, 2021

Please send corrections to *sanskrit@cheerful.com*